2

# पत्रलेखनम्

## (क) अनौपचारिकम् पत्रम्

**1. चौरितस्य स्यूतस्य प्राथमिक-सूचनार्थम् आरक्ष्यधिकारिणं प्रति पत्रं लिखत।**

आरक्ष्यधिकारि-महोदय!

लाजपतनगर-क्षेत्रम्

नवदेहली

विषय:— चौरितस्य स्यूतस्य प्राथमिक-सूचना।

श्रीमन्,

अनेन पत्रेण अहं भवते एतत् सूचयामि यत् ह्य: प्रात: एकादश-वादने रेलमैट्रोयानेन विश्वविद्यालयात् अहं लाजपतनगरम् अगच्छम्। मार्गे मम स्यूतं चोरितम् अभवत्। यस्मिन् द्विसहस्रं रूप्यकाणि, कार्यालयस्य परिचय-पत्रं, मैट्रो चिटिकापत्रं मम आधार-परिचयपत्रं चासन्। स्यूतस्य वर्ण: कृष्ण: आसीत्। अहं प्रार्थये यत् यथाशीघ्रं मम स्यूतम् अन्वेष्य मां कृतार्थं करोतु भवान्।

सधन्यवाद:

निवेदक:

अजय:

निवासस्थानम् – ..........................................

दूरभाष-संख्या – ..........................................

दिनाङ्क:–..........................................

© NCERT not to be republished



Workbook.indd 11 5/24/2019 3:49:37 PM

**2. चोरितायाः घटिकायाः प्राथमिक-सूचनार्थम् आरक्ष्यधिकारिणं प्रति पत्रं लिखत।**

....................................................
....................................................
....................................................
....................................................
....................................................

........................................................................................................................
........................................................................................................................
........................................................................................................................
........................................................................................................................
........................................................................................................................
........................................................................................................................
........................................................................................................................
........................................................................................................................
........................................................................................................................
........................................................................................................................
........................................................................................................................
........................................................................................................................
........................................................................................................................
........................................................................................................................
........................................................................................................................
........................................................................................................................
........................................................................................................................
........................................................................................................................
........................................................................................................................
........................................................................................................................
........................................................................................................................
........................................................................................................................
........................................................................................................................
........................................................................................................................

....................................................
....................................................
....................................................
....................................................
....................................................

© NCERT
not to be republished

## (ख) औपचारिकम् पत्रम्

**1. विज्ञानविषयं प्राप्तुं प्राधानाचार्यं प्रति आवेदनपत्रम्।**

सेवायाम्
प्रधानाचार्यमहोदय!
मीमांसाविद्यालय:, नवदेहली

विषय:- एकादशकक्षायां विज्ञानविषयग्रहणार्थं विशेषानुमतये निवेदनम्।

महोदय,

सविनयं निवेद्यते यदहमस्मिन् विद्यालये प्रथमकक्षात: पठामि। प्रतिवर्षमहम् उत्तमान् अङ्कान् प्राप्य कक्षायां प्रथमस्थानमेव अधिगच्छामि स्म। परमस्मिन् वर्षे परीक्षामध्ये एवाहम् अकस्मात् ज्वरग्रस्त: अभवम्। विज्ञानविषयस्य तु परीक्षाऽपि मया चिकित्सालयात् एव परीक्षाकेन्द्रं प्राप्य प्रदत्ता। फलत: मया आशानुकूल: परीक्षापरिणाम: न प्राप्त:। विद्यालयनियमानुसारं विज्ञानविषयं ग्रहणाय प्रतिशतं केवलम् एकस्य एव अङ्कस्य न्यूनता अस्ति।

महोदय! शैशवादेव मम हार्दिकी इच्छा जीवविज्ञाने शोधं कृत्वा वैज्ञानिक: भवितुमासीत्। परं यदि अहं विज्ञानविषये प्रवेशमेव प्राप्तुमसमर्थ: भविष्यामि तदा कथमहं स्वकीयं स्वप्नं सार्थकं करिष्यामि। अत: मम करबद्ध: अनुरोध: अस्ति। यन्मह्यं विज्ञानविषयं पठितुम् भवान् अनुमतिं प्रयच्छतु। एतदर्थम् अहं पुन: परीक्षणाय अपि सज्ज: अस्मि।

आशासे यत् भवान् मम स्थितिमवगत्य मम विशेषानुरोधं स्वीकरिष्यति।

कृपाकाङ्क्षी
भवदाज्ञाकारी शिष्य:

© NCERT not to be republished

**2. अध्ययनं प्रति मातरं समाश्वासयितुं पुत्र्या लिखितं पत्रं मञ्जूषायां प्रदत्तपदै: पूरयित्वा पुन: लिखत—**

| |
|---|
| कुशलम्, प्रतियोगिता:, कुशलिनी, परिणाम:, चिन्तिता, मतिम्, आनन्देन, करणीया, खेलप्रतियोगितासु, काल: |

परीक्षाभवनत:
दिनाङ्क:..............................

पूज्यमातृचरणा:,
प्रणतीनां शतम्।

अत्रअहं..............................।आशासेभवतीपितृमहोदय:च..............................स्त:।मात:! अहं जानामि यद् भवती मम अर्धवार्षिक-परीक्षापरिणामकारणात् ..............................अस्ति।





Workbook.indd 13 5/24/2019 3:49:38 PM

अत्र चिन्ता न ..................................। प्रथमसत्रे तु अहं ................................ रता आसम्। पठनाय तु .................................... एव न आसीत् परम् अधुना तु सर्वा: .................................................... समाप्ता:। अद्यारभ्य अहं केवलं पठने एव ........................................ विधास्यामि। आशासे वार्षिकपरीक्षायां मम .......................................... भवताम् आशानुकूल: भविष्यति। शेषं सर्वं ................................ भवत्या: चरणयो: प्रणामा:

भवत्या: पुत्री

सुकन्या

**3. जलसंरक्षणस्य महत्त्वं वर्णयत: मित्रं प्रति लिखितं पत्रं मञ्जूषायां प्रदत्तपदै: पूरयित्वा पुन: लिखत—**

| |
|---|
| देशस्य, प्रयतमाना:, अपव्ययम्, विचारयति, जागरूकता, प्रयास:, जानीम:, जीवनम्, सह, अस्तु |

छात्रावासत:

दिनाङ्क:..........................

प्रिय मित्र!

सप्रेम नमोनम:,

अत्र कुशलं तत्र ........................। भवत: पत्रं पठित्वा अतीव प्रसन्नताम् अनुभवामि यत् भवान् मित्रै: ........................ जलसंरक्षणप्रचारकार्ये रतोऽस्ति। एष: तु उत्तम: .................... अस्ति। वयं सर्वे एव ........................ यत् जीवने जलस्य महत्त्वं तु अतुलनीयम्। जलम् एव ........................ इति वयं सर्वे जानीम: परं पुनरपि वयम् अस्य .......................... कुर्म:। अनेन आगामिकाले कियान् भीषणजलसङ्कट: भवेत् इति कोऽपि न ........................। जलसंरक्षणार्थं ........................ अनिवार्या एव। यदि जना: अत्र ध्यानं न दास्यन्ति तदा अस्माकं ........................ स्थितिरपि अफ्रीकादेशवत् भविष्यति। यथा ते जलबिन्दुप्राप्त्यर्थं ........................ सन्ति तथा एव अस्माकं देशस्य अपि स्थिति: भविष्यति। अत: जलसंरक्षणार्थं जागरूकता अनिवार्या। शेषं सर्वं कुशलम्। पितृभ्यां चरणयो: चरणवन्दना।

भवत: मित्रम्

उमेश:

© NCERT not to be republished





Workbook.indd 14 5/24/2019 3:49:38 PM

**4. स्वस्थभोजनस्य महत्त्वं वर्णयन्त्या: अग्रजाया: अनुजं प्रति पत्रम्।**

प्रिय अमित!
सप्रेम नमोनम:।

माता लिखितं पत्रं प्राप्तम्। तेन पत्रेण मया ज्ञातम् यत् भवान् सन्तुलितभोजनं न सेवते, प्रतिदिनं च 'चाऊमीन-बर्गर' इति खादति। ईदृशं भोजनं स्वास्थ्याय सम्यक् न अस्ति। कदाचित् तु अस्य सेवनं कर्त्तुं शक्यते परं प्रतिदिनं त्वरितभोजनस्य सेवनं स्वास्थ्याय हानिकरम्।

स्वास्थ्याय तु सन्तुलितभोजनं ग्रहीतव्यम् एव यत: 'स्वस्थशरीरे एव स्वस्थमनस: वास:' भवति अत: भवान् त्वरितभोजनस्य सेवनं मा करोतु। स्वास्थ्यवर्धकभोजनमेव खादतु। अनेन भवान् कदापि रुग्ण: न भविष्यति। भवान् स्वस्वास्थ्यविषये जागरूक: तिष्ठतु इति मे अनुरोध:।

भवत: अग्रजा
अमिता

**5. सन्तुलितभोजनमेव सेवनीयम् इति वर्णयत: अग्रजस्य अनुजां प्रति पत्रम् लिखत—**

© NCERT not to be republished

परीक्षाभवनत:
दिनाङ्क:..............................

...........................................
...........................................

..............................................................................................................................
..............................................................................................................................
..............................................................................................................................
..............................................................................................................................
..............................................................................................................................
..............................................................................................................................
..............................................................................................................................
..............................................................................................................................
..............................................................................................................................
..............................................................................................................................

भवत: अग्रज:
...........................................



2019-20

Workbook.indd 15 5/24/2019 3:49:38 PM

**6. प्रतियोगिपरीक्षाया: सन्नद्धीकरणाय आरम्भत: एव सामान्यज्ञानस्य अभ्यास: करणीय: इति उपादिशन् पित्रा पुत्रं प्रति पत्रम्।**

जयपुरत:

दिनाङ्क:..............................

प्रिय पुत्र अविनाश!

शुभाशिषो लसन्तु।

आशासे त्वं सकुशल: स्वाध्याये रत: असि। पुत्र! अहं जानामि परीक्षायां तव प्रस्तुति: शोभना भवति। त्वं प्रतिवर्षं कक्षायां प्रथमं स्थानं प्राप्नोषि इति अहं जानामि। ग्रीष्मावकाशे त्वं कथितवान् यत् तव लक्ष्यं प्रतियोगिपरीक्षामुत्तीर्य सङ्घलोकसेवा-आयोगक्षेत्रे सेवाप्रदानम् अस्ति। पुत्र! एतल्लक्ष्यं प्राप्तुं बाल्यकालादेव सामान्यज्ञानस्य अध्ययनं करणीयम्। अत एव विषयस्य अभ्यासेन समम् एकहोरापर्यन्तं सामान्यज्ञानं वर्धयितुं प्रतिदिनं सामाचारपत्रं पठ यदि अधुनात: एतल्लक्ष्यं प्राप्तुं नियमितम् अध्ययनं करिष्यसि नूनमेव साफल्यं लप्स्यसे। यदि काऽपि सहायता अपेक्षिता तर्हि अहम् करिष्यामि।

तव जनक:

आशीष कुमार:

**7. जीवने सफलतां लब्धुं परिश्रमस्य महत्त्वं वर्णयन्त्या: मातु: पुत्रीं प्रति पत्रम् पूरयत—**

कानपुरत:

दिनाङ्क:..............................

प्रिय पुत्रि!

..............................................

..............................................................................................................................................

..............................................................................................................................................

..............................................................................................................................................

..............................................................................................................................................

..............................................................................................................................................

..............................................................................................................................................

..............................................................................................................................................

..............................................................................................................................................

तव जननी

सुधा



© NCERT not to be republished



Workbook.indd 16 5/24/2019 3:49:38 PM

**8. स्वदेशस्य संस्कृतिं वर्णयन्तीं विदेशिनीं सखीं प्रति पत्रं लिखत—**

..............................

..............................

..............................

..............................

..............................................................................................................

..............................................................................................................

..............................................................................................................

..............................................................................................................

..............................................................................................................

..............................................................................................................

..............................................................................................................

..............................

..............................

© NCERT
not to be republished

**9. 'पुत्रीं रक्ष पुत्रीं पाठय' इति अभियानं कथं सार्थकं भविष्यतीति स्वविचारं प्रकटयन् मित्रं प्रति पत्रं लिखत—**

..............................

..............................

..............................

..............................

..............................................................................................................

..............................................................................................................

..............................................................................................................

..............................................................................................................

..............................................................................................................

..............................................................................................................

..............................................................................................................

..............................................................................................................

..............................

..............................





Workbook.indd 17 5/24/2019 3:49:38 PM